# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर/दिसम्बर, २०१६

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – वेदः **कोड – C.C.1.1.1** समयः – ३: ००तः ६:००

दिनाङ्कः – ०९-१२-२०१६ सन्दर्भग्रन्थः – वैदिकसूक्तसंग्रह

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्यां लिखत। ०८**

(१) अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् होतारं रत्नधातमम् ॥

(२) प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरोगीरिष्ठाः।
यस्योरुषुत्रिषु विक्रमणेष्वधिक्षियन्तिभुवनानि विश्वा॥

(३) एना वयं पयसा पिन्वमाना अनुयोनिं देवकृतं चरन्तीः।
न वर्तवे प्रसवः सर्गतक्तः किं युर्विप्रो नद्यो जोहवीति॥

**प्रश्नः – २ ग्रन्थदिशा अग्निसूक्तस्य वर्णनं कुरुत। ०८**

**अथवा**

**ग्रन्थानुसारं विष्णुसूक्तस्य महत्वं प्रतिपादयत**

**प्रश्नः – ३ निम्नलिखितेषु टिप्पणीद्वयं लिखत। ०४**

(१) अग्निदेवः (३) इन्द्रदेवः

(२) विश्वामित्रः (४) वाग्देवी

**प्रश्नः – ४ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत ०५**

(१) 'राय ' इति शब्दस्य कोऽर्थः ?

(२) ग्रन्थानुसारं श्रेष्ठदेवः कोऽस्ति?

(३) 'शतक्रतु' इति पदेन कः सम्बोध्यते ?

(४) अग्निः कस्य लोकस्य देवोऽस्ति ?

(५) 'ऋत्विजम्' इत्यस्य कोऽर्थः ?

(६) कस्मिन् मण्डले विष्णुसूक्तं विद्यते?

(७) त्रेधाशब्दस्यार्थं लिखत।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या विधेया। ०८**

(१) अवर्षीर्वर्षमुदुषूगृभायाकर्धन्वान्यत्यैतवा उ
अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदोमनीषाम् ॥

(२) किमाग आस वरुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायम्।
प्र तन्मे वोचो दूळभस्वधावोऽवत्वानेना नमसा तुरइयाम् ॥

(३) उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु।

त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान्॥

**प्रश्नः – ६ वरुणदेवस्य महत्वं प्रतिपादयत।** ०८

**अथवा**

**पितृसूक्तस्य विषयवस्तु प्रस्तूयताम्**

**प्रश्नः – ७ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) शतक्रतुः (३) आचार्यसायण:

(२) पर्जन्यदेव: (४) पितृदेवः

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) वरुणसूक्तस्य छन्द: किमस्ति ?

(२) कस्मिन् मण्डले वरुणसूक्तं विद्यते?

(३) पितृसूक्तस्य ऋषि: कः ?

(४) पितृसूक्तम् ऋग्वेदस्य कस्मिन् मण्डेले वर्तते ?

(५) पितॄ पुरुषाणां मार्दर्शक: कः ?

(६) स्वधाशब्दस्य कुत्र प्रयोजनम् ?

(७) सोमरसपानप्रियाः के सन्ति ?

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या विधेया।** ०८

(१) यदादीध्ये न दविषाण्येभिः परायद्‌भ्योऽव हीये सखिभ्यः।
न्युप्ताश्च बभ्रवो वाचमक्रतं एमीदेषां निष्कृतं जारिणीव॥

(२) येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्त: प्रजानां तन्मे मन: शिवसंकल्पमस्तु॥

(३) पुनरेहि वाचस्पते देवेन मनसा सह।
वसोष्पते नि रमय मयेवास्तु मयि श्रुतम्॥

**प्रश्नः – १० मेधाजननसूक्तस्य विषयवस्तु प्रस्तूयताम्।** ०८

**अथवा**

**आधुनिकसमाजं प्रति राष्ट्रसभासूक्तस्योपादेयता विवेच्यताम्**

**प्रश्नः – ११ टिप्प्पणीं लिखत। (एकस्य)** ०२

(१) तन्मे मनः शिवसंकल्पमस्तु (२) अक्ष

**प्रश्नः – १२ अधोनिर्दिष्टेषु द्वयो: लघूत्तरं यच्छ।** ०२

(१) अक्षकितवसूक्तस्य छन्द: किमस्ति ?

(२) "कितव" कस्य नाम ?

(३) " शिवः " इति शब्दस्य कोऽर्थ: ?

(४) मेधाजननसूक्तस्य ऋषिः कः ?

***